तत्पर्य्यायो यथा,—
"पाठाम्बष्ठावष्ठकी च प्राचीना पापचेलिका।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
प्राचीनामलकं, क्ली, (प्राचीनमामलकमितिनित्य-कर्म्मधारयः ।) पानीयामलकम् । पानी आमला इति भाषा । तत्पर्य्यायः । वारिवदरम् २ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । २०८ । ४१ ।
"प्राचीनामलकैर्लोध्रै रङ्कोलैश्च सुपुष्पितैः ॥")
अस्य गुणः । दोषत्रयगरनाशित्वम् । इति भावप्रकाशः ॥ (यथा च ।
"गरदोषहरं नीपं प्राचीनामलकन्तथा ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते स्मेति । आ+वी गत्यादौ+क्तः । यद्वा, प्राचीनं आवेतीति । "गत्यर्थेति ।" क्तः ।) श्राद्धादौ वामकरे वहिष्कृते सति दक्षिणस्कन्धार्पितयज्ञसूत्रम् । इत्यमरभरतौ ।२।७ ५० ॥ तथाच कौर्म्मे उपविभागे १० अध्याये ।
"सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः ।
प्राचीनावीतमित्युक्तं पित्रे कर्म्मणि योजयेत् ॥"
प्राचीनावीती, [त्] पुं, (प्राचीनावीतमस्त्यस्येति । प्राचीनावीत+इनिः ।) प्राचीनावीतविशिष्टः । यथा । सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंशे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवतीति । इति गोभिलः ॥ प्रतिष्ठापयति यज्ञोपवीतमिति शेषः । इत्याह्निकतत्त्वम् ॥
प्राचीपतिः, पुं, (प्राच्याः पूर्व्वस्या दिशः पतिः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥
प्राचीरं, क्ली, (प्राचीयते इति । प्र+आ+चिञ्चयने+"शुसिचिमिञां दीर्घश्च ।" उणा० २।२५ । इति क्रन् दीर्घश्च ।) प्रान्ततो वृतिः । इत्यमरः । २ । २ । ३ ॥ पाँचील इति भाषा ॥ दुर्गार्थं नगरादेः प्रान्तभागे वेणुकण्टकवेत्रादिमयी वृतिर्वेष्टनिका । इति भरतः ॥ मृन्मय्यामपि वृतौ प्राचीरमुपचारादिति स्वाम्यादयः ॥ तत्पर्य्यायः । वृतिः २ । इति भट्टः ॥ प्राचीनम् ३ । इति मुकुटः ।
"प्राचीरं प्रावरोऽपि४स्यात् प्रावृतिः५ प्रान्ततो वृतिः ६ ।
इष्टकामृत्तिकाद्यैश्च गृहवाट्यादिवेष्टने ॥"
इति शब्दरत्नावली ॥*॥
अथ प्राचीर निर्णयः ।
"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति ॥
राजदण्डोन्नताः सर्व्वे प्राचीराः पृथिवीभुजः ।
विंशतिस्ते तु पश्चाग्रे पार्श्वयोः पञ्च पञ्च च ॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः
सर्व्वप्रान्ते त्वावरणो नाम प्राचीर उच्यते ॥
प्रतिप्राकारसंस्थानं द्वारं नाभिमुखस्थितम् "॥*
तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः ।
तद्यथा,—
"राजच्छत्रान्तरे पञ्च राजद्वारे महीपतेः ।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः ॥
महद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः ।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति ॥
राजच्छत्रद्वयं सार्द्धमायामे जयवास्तुनि ।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः ॥
राजपट्टाभिधानेन स्थानमेतन्निगद्यते ।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते ॥
अज्ञानादुद्भतो राजा योऽन्यत्र गृहमारभेत् ।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोणाहतिरुपप्लवः ॥
ये चान्ये वास्तुदोषाः स्युः स्थानि दोषाश्च ये पुनः
न स्पृश्यते राजपट्टस्तैः सर्पैर्गरुड़ो यथा ।
द्विगुणादिरतोऽपि स्यात् क्रमाङ्गुलादि वास्तुषु॥
राजच्छत्रमितेऽप्येवं प्राचीरे गुणदोषकौ ॥"
इति युक्तिकल्पतरुः ॥
प्राचेतसः, पुं, (प्रचेतसोऽपत्यमिति । प्रचेतस्+अण् ।) वाल्मीकिमुनिः । इति हेमचन्द्रः । ३ । ५१० ॥ (यथा, रघुः । १५ । ६३ ॥
"अथ प्राचेतसोपज्ञं रामायणमितस्ततः ।
मैथिलेयौ कुशलवौ जगद्गुरुचोदितौ ॥"
प्रचेतसोऽपत्यमात्रम् । विष्णुः । यथा, हरिवंशे । २०३ । १४ ॥
"प्रज्ञया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः ।
विष्णुरेव महायोगी कर्म्मणामन्तरङ्गतः ॥"
दक्षः । यथा, महाभारते । १ । ७५ । ५ ।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत् सहस्रं संसितव्रतान् ॥")
प्राचेतसः, [स्] पुं, प्राचीनबर्हीराजपुत्राः । सान्तनित्यबहुवचनान्तोऽयम् । यथा,—
"एवमुक्तास्तु ते पुत्रास्ततः प्राचेतसो दश ।
पयोधिसलिले मग्नास्तपस्तेपे सुदारुणम् ॥
पतगिराजमारूढं नीलोत्पलदलच्छविम् ।
दृष्ट्वा प्राचेतसः सर्वे शिरोभिरवनीं गताः ॥"
इति वह्निपुराणम् ॥
प्राच्यः, पुं, (प्राचि भवः । प्राच्+"द्युप्रागपागुदक्प्रतीचो यत् ।" ४ । २ । १०१ । इति यत् ।) शरावत्याः प्राग्दक्षिणदेशः । इत्यमरः । २ । १ । ७ ॥ (पुर्व्वदिग्भवे, त्रि । यथा मार्कण्डेये । ५७ । ४२—४४ ।
"———प्राच्यान् देशान् निबोध मे ।
अभ्रारका मुदकरा अन्तर्गिर्य्या वहिर्गिराः ॥
यथा प्रवङ्गा वङ्गेया मालदा मालवर्त्तिकाः ।
ब्राह्मोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः ॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः
मल्ला मगधगोमन्ताः प्राच्या जनपदाः स्मृताः॥"
पूर्व्वदेशीये च, त्रि ॥ (यथा, महाभारते । ८ । ४५ । २८ ॥
"प्राच्या दासा वृषला दाक्षिणात्याः ।
स्तेना वाहीकाः सङ्करा वै सुराष्ट्राः ॥")
प्राजकः, पुं, (प्राजयति प्रकर्षेण गमयति घोटकादीनिति । प्र+अज्+णिच्+ण्वुल् ।) सारथिः । यथा, मनुवचने । ८ । १९३ ॥
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्"
"यत्र सारथेरकौशल्याद्यानमन्यथा गच्छति तत्र हिंसायां अशिक्षितसारथिनियोगात् स्वामी द्विशतं दण्डं दण्ड्यः स्यादिति कुल्लूकभट्टः ।" इति प्रायश्चित्ततत्त्वम् ॥
प्राजनं, क्ली, (प्रवीयतेऽनेनेति । प्र+अज्+ल्युट् । "वा यौ ।" २ । ४ । ५७ ॥ इति पक्षे व्यभावः ।) तोदनम् । इत्यमरः । २ । ८ । १२॥ पाचनीवाड़ी इति भाषा ॥
प्राजापत्यं, क्ली, (प्रजापतिर्देवतास्येति । प्रजापति+'दित्यदित्यादित्यपत्युत्तरपदात् ण्यः ।' ४।१।८५।इति ण्यः ।) द्वादशाहसाध्यव्रतविशेषः तत्र दिवसत्रयं रात्रिमात्रभोजनम्२२ग्रासाः । दिवसत्रयं दिवामात्रभोजनम् २६ ग्रासाः । दिवसत्रयं अजाचितभोजनम् २४ ग्रासाः । दिवसत्रयं उपवासः । यथा,—
"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"
ग्राससंख्या पराशरेणोक्ता ।
"सायं द्वाविंशतिग्रासाः प्रातः षड्विंशतिस्तथा
अजाचिते चतुर्व्विंशः परश्चानशनं स्मृतम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
तत्तु अगम्यागमनादिप्रायश्चित्तम् । यथा,—
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम् ।
शुध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः ।
वैश्यः शान्तपनाच्छूद्रः पञ्चाहोभिर्व्विशुध्यति ॥
प्रायश्चित्ते कृते दद्याद्गवां ब्राह्मणभोजनम् ॥"
इति गारुड़े २२६ अध्यायः ॥*॥
रोहिणीनक्षत्रम् । यथा—
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(प्रजापतेरपत्यमिति । ण्यः प्रजापतिपुत्त्रः । यथा, कुमारे । ६ । ३४ ॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे ।
जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः ॥"
प्रजापतेरिदमिति । प्रजापतिसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । ४८ । ७७ ॥
"प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्त्रियाणां संग्रामेष्वपलायिनाम्)"
प्राजापत्यः, पुं, (प्रजापतेरयमिति । प्रजापति+ण्यः । "प्रजापतेर्यत्र आसीत् प्रयागे ।" इति महाभारतीय । १ । ५५ । १ ॥ वचनात् तथात्वम् ।) प्रयागः । इति त्रिकाण्डशेषः ॥ जैनराजभेदः । तत्पर्य्यायः । त्रिपुत्रः २ । इति हेमचन्द्रः । ३ । ५९ ॥ कायनामकविवाहः ।